विजयानुक्रमेण भवतीत्याह भूमिजयादिति”।
“ननूभयोर्मत्यभावस्तम्भवृत्तावप्यस्तीति कोऽस्मादस्य विशेष इत्यत आह। तृतीय इति अनालोचनपूर्व्वं सकृत्प्रयत्ननिर्वर्त्तितस्तृतीयश्चतुर्थस्त्वालोचनपूर्वोबहुप्रयत्ननिर्वर्त्तनीय इति विशेषः। तयोः पूरकरेचकयोर्विषयो नालोचितोऽयं तु देशकालसङ्ख्याभिरालोचित इत्यर्थः” विवरणम्
“ततः क्षीयते प्रकाशावरणम्” सू०
“प्राणायाममभ्यस्यतोऽस्य योगिनः क्षीयते विवेकज्ञानावरणीयं कर्म्म यत्तदाचक्षते। महामोहमयेन इन्द्रजालेन प्रकाशशीलं सत्वमावृत्य तदेवाकार्य्ये नियुङ्क्ते इति तदस्य प्रकाशावरणं कर्म्म संसारनिबन्धनं प्राणायामाभ्यासात् दुर्बलं भवति प्रतिक्षणं च क्षीयते। तथाचोक्तम् “तपो न परं प्राणायामात्ततो विशुद्धिर्मलानां दीप्तिश्च ज्ञानस्येति” किञ्च धारणासु च योग्यता मनसः प्राणायामाभ्यासादेव। “प्रच्छर्द्दनविधारणाभ्यां वा प्राणस्येति” वचनात्”भाष्यम्
“प्राणायामस्यावान्तरप्रयोजनमाह तत इति। आव्रियतेऽनेन बुद्धिसत्वप्रकाश इत्यावरणं क्लेशः पाप्मा च। व्याचष्टे प्राणायाममिति। ज्ञायतेऽनेनेति ज्ञानं बुद्धिसत्वप्रकाशः विवेकस्य ज्ञानं विवेकज्ञानमावृणोतीति विवेकज्ञानावरणीयं भव्यगेयप्रवचनीयादीनां कर्त्तरि निपातनस्य प्रदर्शनार्थत्वात् कोपनीयरञ्जनीयवत् अत्रापि कर्त्तरि कृत्यप्रत्ययः। कर्म्मशब्देन तज्जन्यमपुण्यं तत्कारणं क्लेशं लक्षयति अत्रैवागमिनामनुमतिमाह यत्तदाचक्षत इति। महामोहोरागः तदविनिर्भागवर्त्तिन्यविद्याऽपि तद्ग्रहणेन गृह्यते। अकार्य्यमधर्म्मः। ननु प्राणायामश्चेत् पाप्मानं क्षिणोति कृतं तर्हि तपसेत्यतआह दुर्बलं भवतीति न तु सर्वथा क्षीयते अतस्तत्प्रक्षयाय तपोऽपेक्ष्यते इति अत्राप्यागमिनामनुमतिमाह तथा चोक्तमिति। मनुरप्याह “प्राणायामैर्द्दहेद्दोषानिति” प्राणायामस्य योगाङ्गता विष्णुपुराणोक्ता “प्राणाख्यमनिलं वश्यमभ्यासात् कुरुते तु यः। प्राणायामः स विज्ञेयः सवीजोऽवीजएव च। परस्परेणाभिभवं प्राणापानौ यदाऽनिलौ। कुरुतस्तद्विधानेन तृतीयं संयमात्तयोः” इति किञ्च व्यासः “प्राणायामोहि मनः स्थिरीकुर्वन् धारणासु योग्यं करोति” विवरणम्” प्राणायामशब्दे विवृतिः
कुम्भमानमुक्तं हेमा० दा० ख० परिभाषाप्रकरणे भविष्यपुराणे “पलद्वयं तु प्रसृतं द्विगुणं कुड़वो मतः। चतुर्भिःकुड़वैः प्रस्थः प्रस्थाश्चत्वार आढकः। आढ़कैस्तैश्चतुर्भिश्च द्रोणस्तु कथितोबुधैः। कुम्भो द्रोणद्वयं शूर्पः खारी द्रोणास्तु षोड़श”। विष्णुधर्म्मोत्तरे “पलञ्च कुड़वः प्रस्थ आढ़को द्रोण एव च। धान्यमानेषु बोद्धव्याः क्रमशोऽमी चतुर्गुणाः। द्रोणैः षोड़शभिः खारी विंशत्या कुम्भउच्यते। कुम्भैस्तु दशभिर्वाहो धान्यसंख्याः प्रकीर्तिताः”।
वैद्यकपरिभाषायां कर्षशब्दे दर्शितं “चतुर्भिराढकैर्द्रोणः कलसोनल्वणोऽर्म्मणः। उन्मानञ्च घटोराशिर्द्रोणपर्य्यायसंज्ञितः। द्रोणाभ्यां शूर्पकुम्भौ च चतुःषष्टिशरावकः”भाव० प्र० वाक्यम्। कुम्भराशिस्तु धनिष्ठाशेषार्द्धशतभिषापूर्व्वभाद्रपदात्रिपादात्मकः स च३६० अंशैर्विभक्तस्य राशिचक्रस्य ३००त्रिशतोत्तरत्रिंशदंशात्मकः। तस्य स्वरूपादिकमुक्तं नील०ता० “कुम्भोऽपदो ना दिनमध्यसङ्गप्रसूः स्थिरः कर्वूरवर्णवायुः। स्निग्धोष्णखण्ड स्वरतुल्यघातः शूद्रः प्रतीची विषमोदयश्च”। तस्य स्वामी शनिः। स च स्थिरराशिः “चरस्थिरद्व्यात्मकनामधेया मेषादयोऽमी क्रमशः प्रदिष्टा”इत्युक्तेः। स च पुष्कराख्यः“पुण्यस्य पुष्करस्यैव आधानाख्यस्तथैव च। स्तुत्याहृत्या भवन्त्येते नित्यं द्वादश राशयः”ज्यो०त०। स च द्विपदराशिः।“मिथुनतुलाघटकन्या द्विपदाख्याश्चापपूर्व्वभागश्च” तत्रोक्तेः“द्विपदवशगाः सर्वे सिंहं विहाय चतुष्पदाः, सलिलनिलया वश्या भक्ष्याः सरीसृपजातयः” तत्रैवोक्तेः तद्राशेः सिंहं विना सर्वे राशयोवश्या जलजरा भक्ष्याः। स च राहोर्मूलत्रिकोणम्। “उच्चं न्दयुग्मं घटभं त्रिकोणम्” इत्युक्तेः। तत्र तुलादितो नवांशा ग्राह्याः “चराणां सत्रिकोणानां तच्चराद्या नवांशका” इत्युक्तेः कुम्भापेक्षया तुलाराशेर्नवमत्वात्तस्य चरत्वाच्च तथात्वम् तस्य लङ्कायामुदयमानं उदयशब्दे ११२०पृ० दर्शितम्। देशभेदे तु भिन्नकालेनेति लग्नकालशब्दे विवृतिः।
११प्रह्लादपुत्रभेदे “प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत!। विशेषतश्च कुम्भश्च निकुम्भइति नामतः” भा० आ० ६५अ० “प्रह्लादोऽश्वशिराः कुम्भः संह्लादोगगनप्रियः” हरिवं० ४२अ०

कुम्भक पु० कुम्भ+स्वार्थे क,कुम्भ इव कायति प्रकाशते निश्चलत्वात् कै—क वा। प्राणायामाङ्गे वायुरोधन व्यापारभेदे कुम्भशब्दे विवृतिः। “कुम्भकोनिश्चल श्वासः”या०स्मृ०।